# M.A. Part-I Examination, 2013

## SANSKRIT

### PAPER – I

*Full Marks* : 100

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

FIRST HALF

[*Marks* : 60]

UNIT – I

1. अधोलिखितेषु मन्त्रेषु ऋषिच्छन्दोदेवतानिर्देश-पूर्वकं - सायणदिशा संस्कृतभाषया कयोश्चित् द्वयोः व्याख्या कार्या — 8 × 2

(*a*) अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।
स इद्देवेषु गच्छति ।।

(*b*) वायवा याहि दर्शतेमे सोमा अरंकृताः । तेषां पाहि श्रुधी हवम् ॥

(*c*) इन्द्रवायु इमे सुता उप प्रयोभिरा गतम् । इन्दवो वायुशन्ति हि ॥

(*d*) इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि बाघतः ।

(*e*) पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥

**2.** अधोनिर्दिष्टासु भाष्यपंक्तिषु कयोश्चित् द्वयोः व्याख्या कार्या — 4 × 2

(*a*) तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यत्वेन बिनियोग : ।

(*b*) वायवायाही' त्यादपस्तृचः प्रउगशस्त्रे बिनियुक्ताः ।

(*c*) प्रातः सवने वैश्वदेवग्रहणादूर्ध्वं प्रउगशस्त्र- होत्रा शंसनीयम् ।

(*d*) आश्विनस्तृचः प्रातरनुवाकस्याश्विने क्रतौ विनियुक्तः ।





*अथवा*

निम्नलिखितेषु मन्त्रेषु द्वयोः भावार्थः संस्कृतभाषया विलिख्यताम्-

(*a*) पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

(*b*) नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् । किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥

(*c*) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्मयज्ञः पृथिवीं धारयन्ति । सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥

(*d*) येनेदं भूतं भुवनं भविष्यत्परि गृहीतममृतेन सर्बम् । येन यज्ञस्तायते सप्तहोता तन्मेमनः शिवसंकल्पमस्तु ॥

**3.** पृथिवीसूक्तस्य वैशिष्ट्यं प्रतिपाद्यताम् । 8

*अथवा*

अग्निदेवतायाः वेदगतचारित्रिकं वैशिष्ट्यं विलिख्यताम् ।

**4.** अधोलिखितेषु पदेषु द्वयोः व्याकरणदिशा साधनप्रक्रिया प्रदर्श्यताम् । 4 × 2

घृताची, दशत, दोषावस्तः श्रुधी ।

*अथवा*

प्रथमप्रश्नान्तर्गतस्य कस्यचिदेकस्य मन्त्रस्य पदपाठं प्रदर्श्य यथेच्छं द्वयोः पदयोः सूत्रोल्लेखपूर्वकं स्वराः साध्यन्ताम् ।

## UNIT—II

**5.** (*a*) पञ्चमहायज्ञेषु वर्णितं मनोवैज्ञानिकतत्त्वं प्रस्तूयताम् । 10

*अथवा*

(*b*) शुनःशोपोपाख्यानं कस्मिन् ब्राह्मणे समुपलभ्यते ? सामाजिकदृष्ट्या तस्य किं तात्पर्यं तत् प्रस्तूयताम् ।

**6.** कठोपनिषदि वर्णितमात्यतत्त्वस्वरूपं सम्यक्प्रकारेण प्रतिपाद्यताम् । 10

*अथवा*

बृहदाख्यकोपनिषदि वर्णितायाः याज्ञवल्कयोपदिष्टायाः शिक्षायाः वैशिष्ट्यमुपवर्ण्यताम् ।





## SECOND HALF

[*Marks* : 40]

**1.** अधोलिखितासु निरूक्तपंक्तिषु कयोश्चित् द्वयोः यास्कानुसारं व्याख्या कार्या — 8 × 2

(*a*) निघण्टव : कस्मात् ? निगमा इमे भवन्ति ।

(*b*) चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च ।

(*c*) षड्भावविकारा भवन्ति इति वार्ष्यायणिः ।

(*d*) तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेन अन्वितौ स्याताम् ।

*अथवा*

निरूक्ताध्ययनस्य किं प्रयोजनं ? इति सम्यगालोच्यताम् ।

**2.** निम्नाङ्कितेषु पदेषु त्रयाणां व्युत्पत्तिः यास्कानुसारतः प्रदेया — 3 × 3

मेघः, वाक्, निघण्टुः, उदक् , उषस्, वैश्वानरः ।

3. वेदस्य लक्षणं प्रामाण्यं च पूर्वपक्षनिरसन-पूर्वकं सायणानुसारं प्रतिपाद्यताम् । 15

*अथवा*

विधिभागस्य प्रामाण्यं सायणानुसारं प्रस्तूयताम् ।